दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णसप्तमी
बैशाख 26 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-196 | 1 | मई 09, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुख्यमन्त्रिणा अधिकारिभिः च सह मेलनाय अधुना 'ऑनलाइन' माध्यमेन 'प्रवेशपत्रं' भविष्यति, चलभाषेण लप्स्यते प्रवेशः

3 'इतिहासोत्सवः- २०२६' संस्कृति- शोध- विरासत- संरक्षणस्य प्रेरकः मञ्चः- आचार्यः डॉ. ललितकुमार अवस्थी

4 राष्ट्रभक्तः महाराणाप्रतापः (जयंतीविशेषः) (9 मई 1540 – 19 जनवरी 1597)

## सुवेन्दु अधिकारी पश्चिम-बङ्गप्रदेशे भाजपा विधायक-दलस्य नेतृत्वेन निर्वाचितः



पश्चिमबङ्गप्रदेशे भाजपेति दलस्य वरिष्ठः नेता सुवेन्दु अधिकारी पश्चिमबङ्गप्रदेशे भाजपा विधायकदलस्य नेतृत्वेन निर्वाचितः, येन तस्य राज्यस्य प्रथमः भाजपा-मुख्यमन्त्री भवितुं मार्गः प्रशस्तः अभवत्। विधायक दलस्य सभायां अधिकारिणः नाम प्रस्ताविततम् आसीत्, तथा च केन्द्रीय गृहमन्त्रिणा अमितशाहेन नवनिर्वाचितानां भाजपा विधायकानां दलस्य वरिष्ठनेतृणां च उपस्थितौ औपचारिकरूपेण घोषितम्।नव-भाजपा-सर्वकारस्य शपथग्रहण समारोहः अद्य कोलकाता नगरस्य ब्रिगेड् परेड ग्राउण्ड् इत्यत्र भविष्यति।

## सोमनाथमन्दिरम्-एकादशे दिनाङ्के गुजरात राज्यस्थितस्य सोमनाथमन्दिरस्य दर्शनं करिष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी मई-मासस्य एकादशे दिनाङ्के गुजरात राज्यस्थितस्य सोमनाथमन्दिरस्य दर्शनं करिष्यति। एकपञ्चाशदधिक-नवदश-शत-तमे वर्षे भारतस्य प्रथम-राष्ट्रपतिना राजेन्द्रप्रसादेन नवीकृतस्य मन्दिरस्य उद्घाटनं कृतम् आसीत्। तस्याः ऐतिहासिक घटनायाः पञ्चसप्ततिवर्ष पूर्तेः स्मरणार्थम् एषा यात्रा आयोज्यते। अद्य प्रधानमन्त्रिणा स्वस्य राष्ट्रिय दैनिके लेखें एषा सूचना प्रदत्ता। स्वस्य लेखे सः उक्तवान् यत् गत-केषुचित् मासेषु सोमनाथसम्बद्धेषु महत्त्वपूर्णेषु कार्यक्रमेषु भागं ग्रहणं तस्य कृते महान् सौभाग्यस्य विषयः आसीत्। अस्य वर्षस्य आरम्भे प्रधानमन्त्री मोदी 'सोमनाथ-स्वाभिमान-पर्व' इत्यस्मिन् कार्यक्रमे अपि सहभागित्वं कृतवान्। अयं कार्यक्रमः मन्दिरस्य उपरि जातस्य प्रथम-आक्रमणस्य सहस्रवर्ष-पूर्त्यवसरे आयोजितः आसीत्। प्रधानमन्त्रिणा सोमनाथः भारतस्य सभ्यतायाः शक्तेः, राष्ट्रीय एकतायाः, संघर्षशीलतायाश्च प्रतीक त्वेन वर्णितम् ।

## डी. आर. डी. ओ.-ओडिशा-तटस्य समीपे 'टैक्टिकल्-अड्वान्स्ड्-नेज्-इति शाखस्य प्रथमं सफलम् उड्डयन-परीक्षणम्



डी आर डी ओ तथा भारतीय वायुसेना इत्येताभ्यां हाः ओडिशा-तटस्य समीपे 'टैक्टिकल्-अड्वान्स्ड्-नेज्-इति शाखस्य प्रथमं सफलम् उड्डयन-परीक्षणं सम्प्रापितम्। रक्षामन्त्री राजनाथ सिंहः अस्य सफल उड्डयन परीक्षणस्य कृते डी. आर्.डी.ओ., भारतीय वायुसेना, डी.सी.पी.पी. तथा सम्बद्ध-उद्योगान् अभिनन्दितवान्। सः एतत् भारतस्य स्वदेशीय-रक्षा-क्षमता संवर्धनस्य दिशि महत्त्वपूर्णं पादक्षेपम् इति वर्णितवान्। तारा भारतस्य प्रथमा स्वदेशीया 'ग्लाइड्-शख-प्रणाली इति अस्ति, या अमार्गनिर्देशित विस्फोटकान् सूक्ष्म-मार्गनिर्देशित शस्त्रेषु परिवर्तयति। अन्याभिः डी. आर्.डी.ओ.-प्रयोगशालाभिः सह सहयोगेन हैदराबाद्-स्थितेन अनुसंधान केन्द्रेण अस्य परिकल्पना तथा विकासः कृतः। एषा स्वदेशीया ग्लाइड्-शख-प्रणाली स्वप्रकारे प्रथमास्ति, यस्याम् अत्याधुनिकाः अल्प-व्यययुक्ताः प्रौद्योगिकयः उपयोजिताः सन्ति । एतत् न्यून-व्यययुक्तस्य शखस्य अग्निशक्ति तथा लक्ष्यभेदन-यथार्थतां वर्धयित्वा भू-लक्ष्यान् प्रभावी-रीत्या निष्प्रभावीकरोति।

## वैश्विकवृद्धेः आई. एम्. एफ्. इत्यस्य अपेक्षानुसारं, भारतस्य योगदानं सम्पूर्ण वैश्विकवृद्धेः सप्तदश प्रतिशतं यावत् अस्ति-एसजयशंकरः



विदेशमन्त्री डा. एस्. जयशङ्करः वैश्विक आर्थिक स्थिरतायाः स्तम्भरूपेण भारतस्य वर्धमान-भूमिकायाः विषये अवधानं दत्तवान् तथा च अन्ताराष्ट्रिय समृद्धौ राष्ट्रस्य महत्त्वपूर्णं योगदानम् अवधानं दत्तवान्। सूरीनाम् देशे सूरीनामी समाजस्य विभिन्नानां वर्गाणां प्रतिनिधि वर्गाणां सम्बोधनावधौ मन्त्रिणा इदम् उक्तम्। सः भारतस्य प्रभावस्य परिमाणम् अधोरेखितुं अद्यतनीयां दत्तांशान् सूचयन् उक्तवान् यत्, अस्मिन् वर्षे वैश्विकवृद्धेः आई. एम्. एफ्. इत्यस्य अपेक्षानुसारं, भारतस्य योगदानं सम्पूर्ण वैश्विकवृद्धेः सप्तदश प्रतिशतं यावत् अस्ति।

## इरान्-देशः कदापि परमाणु-शस्त्राणि न प्राप्नुयात् इति सुनिश्चितं कर्तुं अमेरिकादेशः तथा यूरोपीय-सङ्घः संयुक्तरूपेण कार्यं कुर्वन्तौ-डोलाल्डट्रम्पः



अमेरिकादेशस्य राष्ट्रपतिः डोलाल्ड् ट्रम्पः उक्तवान् यत् इरान्-देशः कदापि परमाणु-शस्त्राणि न प्राप्नुयात् इति सुनिश्चितं कर्तुं अमेरिकादेशः तथा यूरोपीय-सङ्घः संयुक्तरूपेण कार्यं कुर्वन्तौ स्तः। सामाजिक माध्यमे प्रकाशिते सन्देशे ट्रम्पः अवदत् यत् यूरोपीय आयोगस्य अध्यक्षा उर्सुला वॉन डेर लेयेन इत्यनया सह तस्य उत्तमः संवादः अभवत् तथा च पश्चिम एशियायाः स्थितेः विषये चर्चा अपि कृता। ट्रम्पः उक्तवान् यत् उभयपक्षयोः एषा सहमतिः आसीत् यत् यः शासनः स्वजनान् हन्ति, सः कोटिशः जनान् विनाशयितुं समर्थानि शस्त्राणि धारयितुं न अनुमन्येत। यूरोपीय आयोगस्य अध्यक्षा उर्सुला वॉन डेर लेयेनः अपि स्वस्य सामाजिक माध्यम-सन्देशे अस्य वार्तालापस्य पुष्टिं कृतवती। सा पुनः उक्तवती यत् इरान्-देशस्य समीपे कदापि परमाणु-शखाणि न भवेयुः। तया अपि उक्तं यत् अर्वाचीनाः घटनाः क्षेत्रीय स्थिरतायाः तथा वैश्विक-सुरक्षायाः समक्षं विद्यमानान् सङ्कटान् प्रकाशयन्ति।

## सुभाषितम्

**चित्तस्य हि प्रसादेन,**
**हन्ति कर्म शुभाशुभम्।**
**प्रसन्नात्मात्मनि स्थित्वा,**
**सुखमव्ययमश्नुते।।**

भावार्थः- अपने चित्त की प्रसन्नता से मनुष्य शुभ एवं अशुभ कर्मों का विनाश करता है तथा प्रसन्न आत्मा रहकर कभी विनष्ट नहीं होने वाला सुख भोगता है। अतः प्रसन्न रहें।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सम्पूर्ण देशे गृह्य-एल्. पी. जी. इत्यस्य आपूर्तिः सुकरः अस्ति



प्रशासनेन उक्तं यत्, सम्पूर्ण देशे गृह्य-एल्. पी. जी. इत्यस्य आपूर्तिः सुकरः अस्ति, कस्मिन् अपि वितरणसंस्थायां शुष्कतायाः सूचना नास्ति। नवदिल्ल्याम् अन्तर्मन्त्रालयीयं वार्तालापं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस मन्त्रालयस्य सचिवः सुजाता शर्मा इत्येषा उक्तवती यत्, प्रशासनस्य प्रयासः अस्ति यत्, देशीयग्राहकेभ्यः गैस-इत्यस्य अभावः न भवेत् तथा च पश्चिम एशियायाः विकसित स्थिती मूल्यानि स्थिरानि एव भवेयुः ।

# मुख्यमन्त्रिणा अधिकारिभिः च सह मेलनाय अधुना 'ऑनलाइन' माध्यमेन 'प्रवेशपत्रं' भविष्यति, चलभाषेण लप्स्यते प्रवेशः



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-सचिवालये अधुना मुख्यमन्त्रिणा अधिकारिभिः च सह मेलनस्य प्रक्रिया पूर्णतया 'डिजिटल' संजाता। मुख्यमन्त्रिणा सुखविन्दरसिंह सुक्खुना शुक्रवासरे राज्य-सचिवालये 'डिजिटल- द्वार- पत्र- प्रणाल्याः', 'यूनिफाइड डिजिटल- कॅलेण्डर एण्ड अपॉइण्टमेण्ट- मेनेजमेण्ट- सिस्टम' इत्यस्य च शुभारम्भः कृतः। अस्याः नूतन- व्यवस्थायाः अन्तर्गतं अधुना सचिवालयम् आगच्छन्तः जनाः ऑनलाइन-माध्यमेन डिजिटल- द्वारपत्रं प्राप्स्यन्ति, यत् चलभाषे 'डाउनलोड' कर्तुं शक्यते। अनेन कर्गदप्रक्रियायाः समाप्त्या सह प्रवेशव्यवस्था अधिका पारदर्शिनी द्रुता च भविष्यति। मुख्यमन्त्रिणा उक्तं यत् एषः एकीकृत-डिजिटलमञ्चः जनता-सर्वकारयोः मध्ये 'डिजिटल-सेतु' रूपेण कार्यं करिष्यति। अनेन मुख्यमन्त्री-कार्यालयं यावत् गमनस्य मेलनस्य च प्रक्रिया अधिका सरला, व्यवस्थिता, प्रभावशालिनी च भविष्यति। तेनोक्तं यत् प्रदेशसर्वकारः प्रशासनिक-व्यवस्थासु तन्त्रांशस्य अधिकतमप्रयोगे बलं ददाति येन जनेभ्यः श्रेष्ठाः समयबद्धाः च सेवाः लभेरन्।

## 'ओटीपी' तथा 'फेस-ऑथेंटिकेशन' माध्यमेन भविष्यति परिचयः

नूतन- डिजिटल- द्वारपत्र- प्रणाल्यां आधुनिक-सुरक्षा- सुविधाः अपि योजिताः। आगन्तुकस्य परिचयः 'ओटीपी' आधारित-सत्यापनेन तथा आधार- आधारित- मुख- प्रमाणीकरणेन भविष्यति। सुरक्षाकर्मिणः द्वारपत्रे उपलब्धं 'बारकोड' क्रमवीक्षणं कृत्वा प्रवेशस्य पुष्टिं करिष्यन्ति। सर्वकारेण तेभ्यः जनेभ्यः अपि व्यवस्था कृता ये पूर्व-अनुमतिं विना सचिवालयं प्राप्स्यन्ति। तादृशाः आगन्तुकाः स्वागत-कक्षात् साक्षात् डिजिटल-द्वारपत्रं प्राप्तुं शक्ष्यन्ति। अनेन सामान्यजनेभ्यः अनावश्यक- औपचारिकताभ्यः दीर्घ- प्रतीक्षायाः च संबलं लप्स्यते इति आशा वर्तते।

## अधिकारिणां डिजिटल-कॅलेण्डर-पत्राणि स्वतः एव 'अद्यतन' भविष्यन्ति

मुख्यमन्त्रिणा ज्ञापितं यत् एषा प्रणाली मुख्यमन्त्री-कार्यालयस्य कृते प्रमुख-अन्तर्पृष्ठरूपेण कार्यं करिष्यति। अस्य माध्यमेन विविधाः सर्वकारीय-विभागाः उपवेशन-सम्बद्धान् आग्राहान् एकस्मिन् केन्द्रीकृतमञ्चे प्रेषयितुं शक्ष्यन्ति। उपवेशनस्य स्वीकृतौ सत्यां सम्बद्धानां अधिकारिणां डिजिटल-कॅलेण्डर- पत्राणि स्वतः एव 'अद्यतन' भविष्यन्ति, विभागेभ्यः च तत्कालं सूचना मिलिष्यति। सर्वकारस्य मान्यता अस्ति यत् अनेन उपवेशनानां सम्बन्धे पारदर्शिता वर्धिष्यते प्रशासनिक-कार्येषु च तीव्रता आगमिष्यति।

## हिमाचल- भवन- सदनानां सेवाः श्रेष्ठाः भविष्यन्ति

सामान्य- प्रशासन- विभागस्य समीक्षा-उपवेशने मुख्यमन्त्रिणा दिल्लीस्थ- हिमाचलभवनस्य, हिमाचल- सदनस्य, चण्डीगढ़स्थ- हिमाचल-भवनस्य आगन्तुकेभ्यः श्रेष्ठाः सुविधाः दातुं निर्देशाः दत्ताः। तेन स्वच्छता-व्यवस्थायाः परिष्कारे गुणात्मकभोजनस्य उपलब्धौ च विशेषं बलं दत्तम्।

## दिल्लीस्थ- हिमाचल-निकेतनं १५ जून पर्यन्तं पूर्णं कर्तुं निर्देशाः

मुख्यमन्त्रिणा दिल्लीनगरे निर्माणाधीनस्य 'हिमाचल- निकेतन- परियोजनायाः' समीक्षां कुर्वता सा १५ जून दिनाङ्कात् पूर्वं पूर्णं कर्तुं निर्दिष्टा। पञ्जीकरण-प्रक्रियायाः सरलीकरणाय 'क्यूआर-कोड' आधारित-भुक्ति-सुविधां प्रारब्धुं सूचितम्। अस्मिन् उपवेशने अतिरिक्त- मुख्यसचिवः के. के. पन्तः, प्रधानसचिवः देवेशकुमारः, सचिवः डॉ. अभिषेकजैनः, अन्ये वरिष्ठाः अधिकारिणः चोपस्थिताः आसन्।

# 'एनएच' पठानकोट-भरमौर मार्गः 'एनएचएआई' इत्यस्य स्वाधीने, मार्गपरिवहन एवं राजमार्ग मन्त्रालयेन अधिसूचना निर्गता

हिमसंस्कृतवार्ताः- शिमला। पठानकोट- भरमौर राष्ट्रिय-राजमार्गस्य विषये केन्द्रसर्वकारेण महान् निर्णयः स्वीकृतः। अस्य अन्तर्गतं अस्य राजमार्गस्य उत्तरदायित्वम् अधुना प्रदेशसर्वकारेण 'एनएचएआई' (NHAI) इत्यस्मै समर्पितम्। मार्गपरिवहन-एवं-राजमार्ग-मन्त्रालयेन निर्गतायाः नवीन-अधिसूचनायाः अनुसारं राष्ट्रिय- राजमार्गः १५४ ए (NH 154A) अधुना भारतीय- राष्ट्रिय- राजमार्ग-प्राधिकरणस्य (NHAI) अधीनः कृतः। एषः राजमार्गः पञ्जाबस्य चक्की-क्षेत्रतः आरभ्य बनीखेत- चम्बा- भरमौर-पर्यन्तं गच्छति। राष्ट्रिय- राजमार्ग- प्राधिकरण- अधिनियमः, १९८८ इत्यस्य ११-धारायाः अन्तर्गतं एषः निर्णयः स्वीकृतः। अधिसूचनानुसारेण एषः राष्ट्रिय-राजमार्गः पञ्जाबे चक्की-धार- समीपस्थ- सन्धिस्थलात् आरभ्यते। अस्य महत्त्वपूर्ण-मार्गस्य निर्माण- विस्तारीकरण-संरक्षण-विकास-कार्याणि अधुना 'एनएचएआई' इत्यस्य पर्यवेक्षणे भविष्यन्ति। 'एनएच-१५४ ए' हिमाचलस्य पर्यटन- धार्मिक- सामरिक- दृष्ट्या अत्यन्तं महत्त्वपूर्णमार्गेषु गण्यते।

## गतवर्षे आपदा-कारणेन क्षतिग्रस्तः जातः आसीत् राजमार्गः

गतवर्षे आगतायाः आपदः रावी-नद्याः प्रलयस्य च कारणेन अस्य राजमार्गस्य महती हानिः अभवत्, अनेकस्थानेषु तु अस्य अस्तित्वमेव समाप्तं जातम् आसीत्। एतं मार्गं 'एनएचएआई' इत्यस्य अधीने आनेतुं प्रक्रिया प्रायः सार्ध-एकवर्ष-पूर्वं आरब्धा आसीत्। अधुना मार्ग- परिवहन एवं राजमार्ग- मन्त्रालयेन स्व-सहमति-मुद्रा अङ्किता। अनेनैव मार्गेण प्रतिवर्षं लक्षशः भक्ताः मणिमहेश-यात्रायै गच्छन्ति।

# HPRCA- शिक्षकानां विविध-पदानां कृते निर्धारित- शैक्षणिक- योग्यतायां परिवर्तनम्, आवेदन- तिथिः वर्धिता

हिमसंस्कृतवार्ताः- हमीरपुरम्। हिमाचलप्रदेश- राज्य-चयन- आयोगेन विविधपदानां कृते निर्धारितायां शैक्षणिक- योग्यतायां परिवर्तनं कृतम्। अस्य अन्तर्गतं वाणिज्य- शिक्षकः (पोस्ट कोड २६०२०), सङ्गीतशिक्षकः (पोस्ट कोड २६०२१), संस्कृत-अध्यापक (पोस्ट कोड २६०२३), इतिहास- अध्यापकः (पोस्ट कोड २६०२५), हिन्दी- अध्यापक (पोस्ट कोड २६०२६), राजनीतिशास्त्र- अध्यापकः (पोस्ट कोड २६०२८), समाजशास्त्र- अध्यापकः (पोस्ट कोड २६०२९), अर्थशास्त्र- अध्यापकः (पोस्ट कोड २६०३०), मनोविज्ञान- अध्यापकः (पोस्ट कोड २६०३१) लोकप्रशासन- अध्यापकश्च (पोस्ट कोड २६०३४) इत्येतेषां पदानां कृते अधुना ते अभ्यर्थिनः अपि आवेदनं कर्तुं शक्नुवन्ति, यैः स्नातक-परीक्षा 'बी.एड.' परीक्षा च कस्मिन्नपि विषये उत्तीर्णा स्यात्।

**अनिवार्य-योग्यता**-न्यूनतम-अनिवार्या योग्यता एषा भविष्यति यत् स्नातकोत्तर-परीक्षा सम्बद्ध-विषये एव न्यूनतमं ५५ प्रतिशतम् अङ्कैः सह उत्तीर्णा भवेत् तथा 'टैट्' (TET) परीक्षा उत्तीर्णा स्यात्। पूर्वं स्नातक-स्तरे बी.एड. स्तरे च अपि सम्बद्ध-विषयस्य अनिवार्यता आसीत्। किन्तु अधुना बी. एड. स्नातकं च कस्मिन्नपि विषये भवितुं शक्नोति। प्रदेश- शिक्षा- विभागस्य निदेशकेन स्पष्टीकृतं यत् स्नातक- शिक्षायां बी. एड. उपाधिं कस्मिन्नपि सङ्काये प्राप्तवन्तः, शिक्षक-योग्यता-परीक्षाम् उत्तीर्णवन्तः अभ्यर्थिनः पात्राः मन्यन्ते। स्नातकोत्तर- परीक्षायां सम्बद्धविषये न्यूनतम् ५० प्रतिशतम् अङ्कानां प्राप्तिः अनिवार्या अस्ति।

**अभ्यर्थिनः कदा पर्यन्तम् आवेदनं कर्तुं शक्ष्यन्ति?**

वाणिज्य-शिक्षकाय आवश्यक-योग्यतां धारयद्भ्यः अभ्यर्थिभ्यः आयोगेन ११ मई दिनाङ्कतः प्रातः १०:०० वादनतः १६ मई रात्रौ ११:५९ वादनपर्यन्तं षण्णां दिनानाम् अतिरिक्त-अवधिं दत्त्वा पुनः आवेदनानि आहूतानि। योग्याः इच्छुकाः च अभ्यर्थिनः नियमानुसारं आवेदनं कर्तुं शक्नुवन्ति। सङ्गीत- संस्कृत- इतिहास- हिन्दी- अध्यापक- पदानां कृते आयोगेन पात्र-अभ्यर्थिभ्यः १५ मई पर्यन्तं समयः दत्तः। आयोगस्य सचिवेन डॉ. विक्रम महाजनेन उक्तं यत् विविध-अध्यापक-पदानां कृते निर्धारित-पात्रतायां परिवर्तनं कृतम् अस्ति। आयोगस्य जालपुटे अपि एषा अधिसूचना प्रसारिता।

# 'इतिहासोत्सवः- २०२६' संस्कृति- शोध- विरासत- संरक्षणस्य प्रेरकः मञ्चः- आचार्यः डॉ. ललितकुमार अवस्थी
# सरदार- पटेल- विश्वविद्यालयस्य 'इतिहासोत्सवे' गुञ्जिताः संस्कृति-परम्पराणां स्वरलहरीयः





**हिमसंस्कृतवार्ता:- डॉ. अमित शर्मा**
सरदार- पटेल- विश्वविद्यालय- मण्डी इत्यस्य इतिहास-विभागेन इतिहास-सोसायटी द्वारा च मण्डीनगरस्य पञ्चशतवर्षाणां (५००) ऐतिहासिक- विरासतं प्रति समर्पितस्य वार्षिक-समारोहस्य 'इतिहासोत्सवः-२०२६' 'विरासतस्य पदचिह्नानि' इति कार्यक्रमस्य आयोजनं कृतम्। समारोहस्य मुख्यातिथयः विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमार अवस्थीमहोदयः आसन्, यदा च कार्यक्रमस्य अध्यक्षता छात्र-कल्याण- अधिष्ठात्रा आचार्येण राजेशकुमारशर्ममहोदये कृता। विशिष्टातिथिरूपेण अमरचन्दचौहानः, देवराजशर्मा, राजेन्द्रकुमारश्च उपस्थिताः आसन्।कार्यक्रमस्य शुभारम्भः सरस्वतीवन्दनया दीप-प्रज्वालनेन च अभवत्। शोधार्थी वेद-प्रकाशः अतिथीनां परिचयम् अकरोत्। इतिहास- सोसायटी अध्यक्षः सानू कुमारः स्वागतभाषणं कार्यक्रमपरिचयं च प्रस्तौत्। विभागाध्यक्षः डॉ. राकेशकुमारशर्मा विभागीय-प्रतिवेदनं प्रस्तुतवन्तः, यस्मिन् वर्षभरस्य शैक्षणिक- शोध-सांस्कृतिक- सामाजिक- गतिविधीनां सविस्तरं विवरणं दत्तम्।मुख्यातिथिः आचार्यः ललितकुमार अवस्थीमहोदयः स्व-उद्बोधने इतिहासविभागस्य सोसायट्याश्च प्रयासानां श्लाघां कुर्वन्तः अवदन् यत् एतादृशाः आयोजनाः छात्रेषु शोधं, संस्कृतिं, इतिहासञ्च प्रति जागरूकतां जनयन्ति। ते उक्तवन्तः यत् इतिहासोत्सवः केवलं सांस्कृतिकः कार्यक्रमः नास्ति, अपि तु अस्माकं समृद्ध- ऐतिहासिक- विरासतं, सांस्कृतिकचेतनाम्, अकादमिक- परम्पराश्च नूतनपीढीं प्रति सम्प्रेषयितुं सशक्तं माध्यमं वर्तते। ते युवा-पीढीं राष्ट्र-निर्माणायापि प्रेरितवन्तः।कार्यक्रम-अध्यक्षः आचार्यः राजेशकुमारशर्मा एषः मञ्चः छात्राणां प्रतिभा-वर्धनार्थम् उत्कृष्टः प्रयासः इति प्रतिपादितवान्। विशिष्टातिथिना अमरचन्द चौहानेन छात्राः स्व-सांस्कृतिक-मूलैः सह संलग्नाः भवितुं सन्दिष्टः। अस्मिन् अवसरे ग्वालियर- यात्रायाः संस्मरण-आधारितस्य 'विरासत के पदचिह्नम्' इति प्रकाशनस्य वृत्तचित्रस्य च लोकार्पणं मुख्यातिथिना कृतम्।दीपक दीपांशुः विभागस्य 'सर्वश्रेष्ठ- छात्र- पुरस्कारेण' सम्मानितः। तदतिरिच्य नेट (NET) एवं सेट (SET) परीक्षा-उत्तीर्णाः छात्राः जितेन- कर्मा- शिवानी- प्रभृतयः, परीक्षासु प्रथमस्थानं प्राप्तवन्तः नीरज- सपना- श्रिया-आदयः, पूर्वछात्राः योगलता- गीता- नन्दादयः, इतिहास- सोसायट्याः वर्तमानाः पूर्वतन्याश्च पदधिकारिणः मुख्यातिथिना पुरस्कृताः।सांस्कृतिककार्यक्रमेषु छात्रैः पारम्परिक-वेशभूषा- प्रदर्शनं, सयम रायेन एकलगीतम्, आकृति-सपनाभ्यां च शास्त्रीय-नृत्यं प्रस्तुतम्। कार्यक्रमस्य मुख्यम् आकर्षणं पारम्परिक-पहाड़ी-नाटी (लोक-नृत्यम्) आसीत्। समारोहस्य सञ्चालनं दीपक दीपांशु स्मृतिशर्मा, सुहानीभिश्च कृतम्। अन्ते सचिवः लखविन्दरसिंहः धन्यवादं ज्ञापितवान्। अस्मिन् अवसरे डॉ. पवन चन्दः, डॉ. सनील ठाकुरः, डॉ. जगदीप वर्मा, डॉ. चेतन चौहानः, अनिल शर्मा इत्यादयः अन्याः गणमान्यसदस्याः छात्राश्च उपस्थिताः आसन्।

# शिमलातः गग्गल-पर्यन्तं विमानसेवा ११ मई दिनाङ्कतः, सप्ताहे पञ्च दिनानि उड्डयनं, यात्रिकेभ्यः सौकर्यम्



**हिमसंस्कृतवार्ता:- काङ्गड़ा।** काङ्गड़ा-शिमला-नगरयोः मध्ये विमान-सम्पर्कः पुनः आरप्स्यते। ११ मई दिनाङ्कतः शिमलातः गग्गल- विमानक्षेत्रं प्रति 'एलायन्स एयर' इत्यस्य नियता विमानसेवा आरभ्यमाणा अस्ति। दीर्घकालात् स्थगितायाः अस्याः सेवायाः पुनरारम्भणेन पर्यटन- उपाहारगृह-स्थानीय- परिवहन- क्षेत्रेभ्यः महती सहायता लप्स्यते इति आशा वर्तते। प्राप्त-सूचनानुसारं 'एलायन्स एयर' इत्यस्य विमानं सोम- बुध- गुरु- शुक्र- शनिवासरेषु शिमलातः उड्डयनं कृत्वा प्रातः दशवादने गग्गल- विमानक्षेत्रं प्राप्स्यति, ततः किञ्चित् कालानन्तरं पुनः शिमला-नगरं प्रति प्रस्थास्यति। अस्यै विमान-सेवाये 'ऑनलाइन' प्रवेशपत्र- आरक्षणम् अपि आरब्धम्, येन यात्रिकेषु उत्साहः दृश्यते। उल्लेखनीयं यत् गत- अनेक- मासेभ्यः शिमला- गग्गल, दिल्ली-गग्गल मार्गेषु च एषा सेवा स्थगिता आसीत्।
विशेषरूपेण धर्मशाला- मकलोडगञ्ज-काङ्गड़ा- उपत्यका दर्शनाय आगमिष्यतां पर्यटकानां कृते एषा सेवा अत्यन्तं लाभकारिणी सिद्धा भविष्यति। शिमलानगरेण सह साक्षात् विमान-सम्पर्क- कारणेन प्रदेशस्य द्वौ प्रमुखौ पर्यटन-केन्द्रौ अधुना अधिक- सुगमतया सम्बद्धौ भविष्यतः। स्थानीयाः 'टैक्सी' चालकाः, 'ट्रेवल' संस्थाः, होटल व्यवसायिनः च कथयन्ति यत् विमान-सेवया पर्यटन- गतिविधिषु तीव्रता आगमिष्यति। स्थानीयाः जनाः अपि एतं पदक्षेपं सुखदं प्रशंसनीयं च मन्यन्ते। वर्तमाने 'इण्डिगो एयरलाइन्स' इत्यस्य त्रीणि विमानानि सोम-मङ्गल- गुरु- शुक्रवासरेषु दिल्लीतः गग्गलक्षेत्रं प्रति आगच्छन्ति। अपरतः 'स्पाइस जेट' इत्यस्यापि द्वे विमान-सेवे दिल्ली-तः गग्गल- विमानक्षेत्राय कार्यरते स्तः।

# निर्वाचनकर्तव्यनिरतानां कर्मचारिणां मानदेयवृद्धिः-: मतदानकर्मिभ्यः भविष्यति अधिकं पोषकद्रव्यम्




**हिमसंस्कृतवार्ता:- शिमला।** राज्यसर्वकारेण निर्वाचनकर्तव्यसमये प्रदीयमानस्य मानदेयस्य, भोजनभत्तस्य तथा अन्यव्ययदराणां वृद्धिः कृता। नवीनाः दराः पञ्चायतीराजसंस्थानां निर्वाचनषु प्रवर्तिष्यन्ते, येन निर्वाचनकर्तव्यं निर्वहद्भ्यः कर्मचारिभ्यः आर्थिकसाहाय्यं भविष्यति। अधुना मतदानदलस्य तथा सुरक्षाकर्मिणां कृते मतदानदिवसे प्रति व्यक्तिं 225 रूप्यकाणां भोजनभत्तः प्रदास्यते। पूर्वं एषा राशि प्रति व्यक्तिं 100 रूप्यकाणि आसीत्। एवं मतगणनाकर्मिभ्यः अपि प्रति व्यक्तिं 225 रूप्यकाणि प्रदास्यन्ते। तथापि निर्देशाः प्रदत्ताः यत् यदि मतगणना चतुर्घण्टाभ्यः न्यूनकाले सम्पूर्णा भवति, तर्हि केवलं लघुजलपानमेव प्रदास्यते। पीठासीनाधिकारिणां कृते आकस्मिकव्ययराशिः अपि वर्धिता अस्ति। पूर्वं प्रत्येकचरणस्य कृते 100 रूप्यकाणि प्रदीयन्ते स्म, यानि अधुना वर्धयित्वा 200 रूप्यकाणि कृतानि। तथैव सहायक-रिटर्निङ्ग-अधिकारिणां (एआरओ) कृते अपि आकस्मिकव्ययराशिः 100 रूप्यकेभ्यः वर्धयित्वा 200 रूप्यकाणि कृता। एषा सुविधा केवलं पञ्चायतीराजसंस्थानां निर्वाचनेषु एव प्रवर्तिष्यते। निर्वाचनकर्तव्ये नियुक्तानां वाहनानां मर्मतकार्यस्य कृते अपि राज्यसर्वकारेण महती राहत् प्रदत्ता। पूर्वं लघुमर्मतकार्यस्य कृते अधिकतमं 500 रूप्यकाणां अनुमतिः आसीत्, या अधुना वर्धयित्वा 1550 रूप्यकाणि कृता। सहायक- रिटर्निङ्ग- अधिकारिणः (एआरओ) मानदेयं 3500 रूप्यकेभ्यः वर्धयित्वा 4250 रूप्यकाणि कृतम्। पीठासीनाधिकारिभ्यः प्रति चरणं 850 रूप्यकाणि, मतदानाधिकारिभ्यश्च प्रति चरणं 800 रूप्यकाणि प्रदास्यन्ते।

# राष्ट्रभक्तः महाराणाप्रतापः (जयंतीविशेषः)

## (9 मई 1540 – 19 जनवरी 1597)

डॉ विमलेश झा,डीएवी पब्लिक स्कूल,बरारी भागलपुर, बिहार

भारतभूमिः आदिकालात् वीराणां, त्यागिनां, राष्ट्रभक्तानां च जननी अस्ति। अस्यां पुण्यभूमौ अनेके महापुरुषाः अभवन् ये स्वधर्मरक्षणाय, राष्ट्रस्य गौरवरक्षणाय, स्वाभिमानस्य पालनाय च स्वजीवनं समर्पितवन्तः। तेषु महाराणा प्रतापस्य नाम अत्यन्तं गौरवेन उच्चार्यते। एषः केवलं मेवाडस्य राजा नासीत्, अपि तु भारतीय स्वतन्त्रतायाः, आत्मगौरवस्य, राष्ट्रभक्तेः च अमरप्रतीकः आसीत्। यदा भारतस्य अधिकांशभागः मुगलशासनस्य अधीनः अभवत्, तदा महाराणा प्रतापः अदम्यसाहसेन स्वराज्यरक्षणाय संघर्षं कृतवान्।

महाराणाप्रतापस्य जीवनं त्यागस्य, संघर्षस्य, राष्ट्रप्रेम्णः, स्वाभिमानस्य च अद्वितीयम् उदाहरणम् अस्ति। एषः वनवासस्य दुःखानि, दारिद्र्यं, परिवारस्य कष्टानि च सोढ्वा अपि कदापि शत्रोः समक्षं नतमस्तकं न अभवत् । अतः भारतीयजनमानसे एषःअद्यापि राष्ट्रभक्तस्य आदर्शरूपेण प्रतिष्ठितः अस्ति।

महाराणा प्रतापस्य जन्म 1540तमे वर्षे मईमासस्य नवमदिनांके कुम्भलगढदुर्गे अभवत्। एतस्य पिता उदयसिंहः मेवाडस्य राजा आसीत् तथा माता जयवन्ताबाई आसीत्। बाल्यकालात् एव प्रतापः तेजस्वी, साहसी, स्वाभिमानी च आसीत्।

एषः युद्धविद्यायां, अश्वारोहणे, धनुर्विद्यायां, खड्गचालने च अत्यन्तं प्रवीणः अभवत्। गुरवः तस्य प्रतिभां दृष्ट्वा विस्मिताः भवन्ति स्म। बाल्ये एव तस्य मनसि राष्ट्रप्रेम, धर्मनिष्ठा, प्रजासेवा च दृढतया स्थापिताः। प्रतापः साधारणबालकवत् विलासप्रियः नासीत्। एषः कठिनजीवनं, शौर्यं, अनुशासनं च अधिकं प्रियं मन्यते स्म। एते गुणाः तस्य भाविजीवनस्य आधाराः अभवन्।पितुः निधनानन्तरं प्रतापः मेवाडस्य सिंहासने आरूढः अभवत्। तस्मिन् समये भारतस्य अधिकांशराज्यानि अकबरस्य आधिपत्यं स्वीकृतवन्तः आसन्। अकबरः शक्तिशाली मुगलसम्राट् आसीत्। एषःअनेकान् राजपूतराज्ञः स्वसाम्राज्ये समाविष्टवान्।अकबरः महाराणा प्रतापस्य समीपं बहुवारं दूतान् प्रेषितवान् यत् एषःतस्य अधीनतां स्वीकरोतु। किन्तु प्रतापः स्पष्टतया उक्तवान् यत् मेवाडस्य स्वाधीनता तस्य प्राणेभ्यः अपि अधिका अस्ति।एषः पराधीनतां कदापि न स्वीकृतवान्। एषा दृढता एव एतस्य राष्ट्रभक्तेः प्रमाणम् आसीत्। एषः ज्ञातवान् यत् स्वराज्यस्य रक्षणाय संघर्षः आवश्यकः अस्ति। अतः एषः जीवनपर्यन्तं युद्धमार्गम् एव अवलम्बितवान्।

महाराणा प्रतापस्य राष्ट्रभक्तिः केवलं शब्देषु नासीत्, अपि तु तस्य सम्पूर्णजीवनमेव राष्ट्रभक्तियुक्तम् आसीत्। एषः मेवाडभूमिं मातृरूपेण पश्यति स्म। मातृभूमेः संरक्षणाय एषः सर्वस्वं त्यक्तवान्।

1. स्वराज्यरक्षणम्-प्रतापस्य जीवनस्य मुख्यलक्ष्यम् आसीत्—मेवाडस्य स्वतन्त्रतारक्षणम्। यद्यपि अकबरस्य सेना विशालाऽभवत् तथापि प्रतापः कदापि भयभीतः नाभवत्। एषः स्वल्पसैन्येन अपि शत्रोः विरोधं कृतवान्।

२. स्वाभिमानरक्षणम्-राष्ट्रभक्तस्य प्रमुखलक्षणं स्वाभिमानः भवति। महाराणा प्रतापः स्वाभिमानस्य प्रतिमूर्तिः आसीत्। अकबरस्य अधीनतां स्वीकृत्य एषः सुखं, वैभवं, ऐश्वर्यं च प्राप्तुं शक्नोति स्म,
किन्तु एषः स्वाभिमानस्य महत्त्वं सर्वाधिकं मन्यते स्म।

३. त्यागभावना-राष्ट्रहिताय त्यागः आवश्यकः भवति। प्रतापः राजभवनस्य सुखानि त्यक्त्वा वनेषु जीवनं यापितवान्। तस्य परिवारः अपि अनेकानि कष्टानि असह्यत , किन्तु प्रतापः राष्ट्रधर्मात् विचलितः नाभवत्।

महाराणा प्रतापस्य जीवनस्य सर्वाधिकं प्रसिद्धं युद्धं हल्दीघाटीयुद्धम् आसीत्। एतस्मिन् युद्धे अकबरस्य सेनायाः नेतृत्वं राजा मानसिंहः करोति स्म। सेनायाः न्यूना संख्या सत्यपि



युद्धभूमौ महाराणा प्रतापः अद्वितीयं पराक्रमं प्रदर्शितवान्। एतस्य प्रियः अश्वः चेतकः अपि अस्मिन् युद्धे अमरः अभवत्। चेतकस्य स्वामिभक्तिः विशिष्टः आसीत्।

चेतकः केवलम् अश्वः नासीत्, अपि तु प्रतापस्य अभिन्नं मित्रम् अपि आसीत्। युद्धकाले चेतकः गम्भीररूपेण आहतो भूत्वा अपि सः स्वामिनं सुरक्षितस्थलं नीतवान्। अन्ते सः स्वप्राणान् त्यक्तवान्। चेतकस्य कथा भारतीयेतिहासे स्वामिभक्तेः अद्वितीयम् उदाहरणम् अस्ति।

यद्यपि हल्दीघाटीयुद्धस्य तात्कालिकविजयः मुगलपक्षे आसीत्, तथापि अकबरः महाराणा प्रतापं पूर्णतया पराजेतुं न अशक्नोत् । प्रतापः पुनः शक्तिसञ्चयं कृत्वा संघर्षं निरन्तरम् अकरोत् ।हल्दीघाटीयुद्धानन्तरं प्रतापः परिवारसहितः पर्वतेषु, वनेषु च जीवनं व्यतीतवान्। एषः घोरदारिद्र्यं सोढ्वापि जीवनयापनं कृतवान्।एतादृशेषु दुःखेषु अपि प्रतापः स्वाधीनतायाः मार्गं न त्यक्तवान्।अयं प्रसंगः दर्शयति यत् राष्ट्रभक्तिः केवलं वाणीमात्रं नास्ति, अपि तु त्यागस्य, धैर्यस्य, संघर्षस्य च नाम अस्ति।महाराणा प्रतापस्य राष्ट्रसंघर्षे भामाशाहस्य योगदानम् अत्यन्तं महत्त्वपूर्णम् अस्ति। सः प्रतापस्य विश्वस्तमन्त्री आसीत्। यदा प्रतापस्य आर्थिकस्थितिः अत्यन्तं दयनीया अभवत् तदा भामाशाहः स्वसम्पूर्णधनं राष्ट्रहिताय अर्पितवान्।

तेन प्राप्तेन धनेन प्रतापः पुनः सेनां संगठितवान् तथा अनेकप्रदेशान् पुनः स्वाधीनान् अकरोत्। भामाशाहस्य त्यागः अपि राष्ट्रभक्तेः महत् उदाहरणम् अस्ति।महाराणा प्रतापः केवलं वीरयोद्धा नासीत्, अपि तु प्रजावत्सलः राजा अपि आसीत्। सः प्रजायाः दुःखं स्वदुःखं मन्यते स्म।

वनवासकाले अपि सः प्रजाजनानां रक्षणं कृतवान्। तस्य शासनं न्यायपूर्णं तथा धर्माधारितम् आसीत्। कृषकाः, सैनिकाः, सामान्यजनाः च तस्मिन् अत्यन्तं विश्वासं कुर्वन्ति स्म। महाराणा प्रतापः सनातनधर्मस्य रक्षकः आसीत्। तस्य युद्धं केवलं राज्यस्य कृते नासीत्, अपि तु धर्मसंस्कृतेः रक्षणाय अपि आसीत्।सः भारतीयपरम्पराणां, संस्कृतेः, धर्मस्य च संरक्षणाय जीवनं समर्पितवान्। अतः भारतीयसमाजः एतं धर्मवीररूपेण अपि स्मरति।महाराणा प्रतापः कुशलः प्रशासकः अपि आसीत्।एषः प्रजाहितं सर्वदा मनसि धारयति स्म। तेन कृषकाणां संरक्षणं, व्यापारस्य प्रोत्साहनं, सुरक्षाव्यवस्था च सम्यक् प्रकारेण सञ्चालिता।

सः भीलजनजातीनां सहयोगं प्राप्तवान् तथा तेषां सम्मानं कृतवान्। अनेन कारणेन सामान्यजनाः अपि तस्य राष्ट्रसंघर्षे सहभागिनः अभवन्।महाराणा प्रतापस्य वीरता भारतीयसाहित्यस्य महत्त्वपूर्णविषयः अस्ति। अनेके कवयः तस्य शौर्यगाथां वर्णितवन्तः। लोकगीतेषु, कवितासु, नाटकेषु च प्रतापस्य चरित्रं अद्यापि जीवति। संस्कृतसाहित्ये अपि महाराणा प्रतापस्य प्रशंसा दृश्यते। कवयः एतं “राष्ट्रभक्तानां शिरोमणिः” इति रूपेण वर्णयन्ति।

अद्यतनकाले अपि महाराणा प्रतापस्य जीवनं अत्यन्तं प्रेरणादायकम् अस्ति।यदा अपि समाजे राष्ट्रभक्तानां चर्चा भविष्यति तदा तत्र महाराणा प्रतापस्य नाम अवश्यमेव जनाः स्वीकरिष्यन्ति।तस्य जीवनेन वयं शिक्षाम् प्राप्नुमः—राष्ट्रहितं सर्वोपरी वर्तते। सम्प्रति महाराणाप्रतापमहोदयः अस्माकं मध्ये न अस्ति,किन्तु तस्य यशः, एतस्य राष्ट्रभक्तिः, तस्य वीरता च अद्यापि अमराः सन्ति।एतस्य मृत्युसमये अपि एषः मेवाडस्य स्वाधीनतायाः विषये चिन्तां करोति स्म। एतत् एतस्य राष्ट्रप्रेम्णः परमं प्रमाणम् अस्ति। महाराणा प्रतापः भारतीयेतिहासस्य अमरनायकः आसीत्। एतस्य जीवनं राष्ट्रभक्तेः, स्वाभिमानस्य, त्यागस्य, धर्मनिष्ठायाः च उत्कृष्टम् उदाहरणम् अस्ति। एषः केवलं मेवाडस्य राजा नासीत्, अपि तु सम्पूर्णभारतस्य गौरवः आसीत्।एतस्य संघर्षः दर्शयति यत् सत्यस्य, धर्मस्य, स्वाधीनतायाः च रक्षणार्थं कठिनतमपरिस्थितिषु अपि धैर्यं न अस्माभिः त्यक्तव्यम् । राष्ट्रभक्तः महाराणा प्रतापः अद्यापि प्रत्येकभारतीयस्य हृदये जीवति । अतः वयं सर्वे एतस्य जीवनेन शिक्षां प्राप्य सर्वा राष्ट्ररक्षायै तत्पराः भवेम। अस्मिन् अवसरे वयं सर्वे मिलित्वा एतस्मै राष्ट्रभक्ताय प्रमाणांजलिं अर्पयामः। अन्ते च -माता भूमिः पुत्रोऽहं पृथिव्याः। इत्यलम्।

# "लौकिकन्यायकोशः"
# "गोमयवृश्चिकन्यायः"

गोमयात् वृश्चिकाः जायन्ते इति कश्चन प्राचीनः विश्वासः। अर्थात् गोमये अदृश्यरूपेण वृश्चिकस्य अंश भवेत्। सः स्वाभाविकः। दुष्टे मनुष्ये दुष्टत्वं स्वाभाविकमेव इति अस्य आशयः। यथा- दृश्यते हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनाम् उत्पत्तिः, अचेनत्वेन प्रसिद्धेभ्योः गोमयादिभ्यो वृश्चिकादीनाम्।। {ब्रह्मसूत्रशाङ्करभाष्ये २-१-६ }

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। पूर्वं श्रुतं यत् विदेशात् जनाः भारतं प्रति आगच्छन्ति, तत् शोभनम्। अद्यतनं मुख्यं वृत्तं पश्य। एकेन प्रसिद्ध-गायकेन आरोपः कृतः यत् वाहन-निर्माण-संस्थया तस्य रहस्य-विवरणं प्रसारितम्। अतः तेन बहवः अनपेक्षिताः दूरभाष-ध्वनयः प्राप्ताः सन्ति।

**नन्दिनी-** एतत् तु चिन्ताजनकम्, वैयक्तिक- विवरणस्य रक्षणम् आवश्यकम्। अन्यत् वृत्तं शृणु। आयुर्विज्ञान-संस्थाने चत्वारिंशत् दृष्टिहीनेभ्यः बालकेभ्यः कृत्रिम-बुद्धि-युक्तानि उपनेत्राणि वितरितानि। एतैः यन्त्रैः तेषां जीवने प्रकाशः आगमिष्यति।

**काव्या-** सत्यम्, विज्ञानं वरदानम् अस्ति। उत्तर- प्रदेशस्थया सारा-नामिकया बालिकया दर्शन- श्रवण-असमर्थया परीक्षायां महासिद्धयः प्राप्ताः। तया अष्टनवति-प्रतिशतम् अङ्काः लब्धाः सन्ति। सा दृढनिश्चयवती अस्ति।

**नन्दिनी-** तस्याः धैर्यं प्रशंसनीयम्। एवं परोपकारस्य वार्ता अपि अस्ति। एका विदेशिनी द्विचक्रिका-चालिका भारते राजमार्गे सङ्कटे अभूत्। सा त्रिभिः अपरिचितैः जनैः रक्षिता। सा वदति यत् ते तस्याः कृते स्थिताः।

**काव्या-** अहो, मानवता अद्यापि जीवति। अद्य एतावदेव। पुनर्मेलिष्यामः।